Postal Regd.No. GAMC- 1553/2022-2024
ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १७ अङ्क : १९६
सप्टेम्बर - २०२२

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### त्यागस्य विस्मरणम्

कस्मिंश्चित् ग्रामे केनचित् स्थविरेण सह मम मेलनम् अभवत्। तस्य कथनम् आसीत् यत् 'धर्मः' स्वयं त्यागस्य रूपम् अस्ति। अपि च त्यागः महती कठिना कठोरा वा साधना वर्तते। कथनावसरे ममापि स्वीयं बाल्यं स्मृतिपथम् आयातम्। तदा अहम् अष्टवर्षदेशीयः आसम्। इतोऽपि मनः निर्मलम् आसीत्। तत् वितर्काणां रेखाभिः अङ्कितं न आसीत्। अस्मिन् वयसि कदाचित् वनभोजनोत्सवे मम नदीतटगमनम् अभवत्। नदी लघ्वी आसीत्, परं तत्र सिकतानां साम्राज्यम् अद्भुतम् आसीत्। सिकतासु च विचित्रवर्णाः भास्वराः पाषाणविशेषाः अपि दृश्यन्ते स्म। अहं तु कुबेरस्य निधिम् इव प्राप्तवान्! मया सायं यावत् बहूनां पाषाणखण्डानां सङ्ग्रहः कृतः। परन्तु सूर्ये अस्तं गते, तान् गृहं कथं नयामि इति अतिप्रश्नः उद्भूतः। प्रस्थानवेलायां सः पाषाणनिधिः मया कथञ्चित् त्यक्तः। हृदयं व्याकुलतां गतम्। परन्तु अन्यत्र पश्यतः मम महत् आश्चर्यम् अभवत्। तत्र-तत्र उपस्थितेषु इतरेषु जनेषु पाषाणखण्डान् प्रति काऽपि आसक्तिः न आसीत्। ते तु विरक्तभावेन पश्यन्ति स्म। तस्मिन् काले अहं चिन्तितवान् यत् इह लोके एते जनाः त्यागशीलाः सन्ति। एते एव धन्याः सन्ति।

परन्तु अद्य अहं किमपि भिन्नमिव चिन्तयामि। वस्तुतः यः पाषाणः अस्ति तं वयं पाषाणरूपेण एव सम्यक् जानीमः चेत् 'त्याग' शब्दस्य स्मरणं न भवति। यतो हि अज्ञानं भोगः अस्ति, ज्ञानं त्यागः अस्ति।

भवतु नाम व्याकरणस्य सिद्धान्तेन 'त्याग' शब्दः क्रियायाः बोधं कारयति, परन्तु तत्त्वतः 'त्याग' शब्दः क्रियावाचकः नास्ति। अर्थात् कोऽपि मनुष्यः त्यागं कर्तुं न शक्नोति। त्यागः तु केवलं ज्ञानस्य परिणामः अस्ति। यदा ज्ञानं प्रकाशते तदा त्यागः स्वयं हि जायते। तथैव भोगः अज्ञानस्य सहजः परिणामः अस्ति।

एवं चेत् त्यागः कठिनः अस्ति इति धारणा वृथा एव। क्रिया सरला कठिना वा भवितुम् अर्हति। किन्तु त्यागः परिणामः अस्ति। तत्र एते गुणाः न तिष्ठन्ति। अन्ते वक्तुं शक्यते यत् मोक्षः अपि त्यागस्य परिणामः अस्ति, त्यागस्य फलं नास्ति।

## दण्डव्यामोहस्य कारणतः...



रामः प्रकाशश्च प्रसिद्धस्य वनाचार्यस्य महर्षेः शिष्यौ । उभौ अपि अध्ययने निपुणौ । उपनिषदः, वेदाः, शास्त्राणि च ताभ्यां सम्यक् एव अधीतानि । ताभ्यां काश्चन सिद्धयः अपि प्राप्ताः आसन्।

वनाचार्यस्य आश्रमः सरयूनद्याः तीरे आसीत् । तस्य गुरुः हिमालये निवसति स्म । कदाचित् कश्चन यात्रिकः आगत्य वनाचार्यम् उक्तवान् – ''भवतः गुरुः भवन्तम् अविलम्बेन द्रष्टुम् इच्छति । अतः भवता हिमालयस्थं तदीयम् आश्रमं प्रति गन्तव्यम्'' इति।

एतत् श्रुतवान् वनाचार्यः शिष्यान् अवदत् – ''मया इदानीम् एव हिमालयः गम्यते। भवन्तः स्वव्यवस्थां स्वयं द्रष्टुमर्हन्ति'' इति।

आश्चर्यचकिताः शिष्याः पृष्टवन्तः – ''किमर्थम् एतावती त्वरा ?'' इति।

वनाचार्यः अवदत् – ''अविलम्बेन गुरोः आज्ञायाः पालनं शिष्यस्य आद्यं कर्तव्यम् । अतः मया गम्यते इदानीम् एव'' इति । ''गुरुवर्य ! इतः गमनात् पूर्वम् आश्रमस्य सुचारुव्यवस्था निर्विघ्नतया यथा प्रचलेत् तथा करणं वरं खलु ?'' इति अपृच्छत् कश्चन शिष्यः।

''आश्रमस्थाः स्वस्य व्यवस्थां स्वयं निर्वहेयुः। सर्वं भगवदधीनम् अस्ति'' इति अवदत् वनाचार्यः।

''कदा प्रत्यागमनं भवेत् ?'' ''न जाने। कदाचित् न प्रत्यागच्छेयम् अपि'' इति अवदत् वनाचार्यः।

इतोऽप्यधिकतया वार्तालापं कर्तुम् अनिच्छन् सः पार्श्वस्थां नदीम् अतिक्रम्य हिमालयं प्रति प्रस्थितवान्।

अनन्यगतिकतया रामप्रकाशौ, अन्ये शिष्याः, केचन भक्ताः च नदीक्रमणात् पूर्वं तस्य आशीर्वादं प्राप्य आप्रच्छनम् उक्तवन्तः।

रामः तस्मिन् एव आश्रमे वासम् अनुवर्तयितुम् इष्टवान् । किन्तु प्रकाशः आश्रमं परित्यज्य स्वग्रामं प्रति गतवान् । तत्र तद्विषये जनानाम् आदरः आसीत् । अल्पेन एव कालेन तेन बहवः भक्ताः प्राप्ताः । सः स्वामी प्रकाशानन्दः इति नाम प्राप्तवान्।

एवं प्रसिद्धेः प्राप्तेः अनन्तरम् अपि सः पवित्रं जीवनम् एव यापयति स्म । लघुनि कुटीरे वासः । कटे शयनम्। पाकार्थं कानिचन पात्राणि। धरणार्थं काषायवस्त्रयुगलम्। एतावती एव सम्पत्तिः तस्य।

प्रकाशानन्दः इव रामः अपि स्वामी रामानन्दः जातः आसीत् । तस्य विषये असन्तोषः आसीत्

प्रकाशानन्दस्य। रामानन्दः वैभवोपेतं जीवनं यापयति स्म। कश्चन धनी भक्तः तस्य वासाय उत्तमं भवनं निर्माप्य दत्तवान् आसीत्। तस्य सेवायै केचन नियुक्ताः आसन् अपि। धनिकस्य गृहे सज्जीकृतः विशेषपाकः सेव्यते स्म रामानन्देन।

'अहो, मम मित्रस्य दुर्गतिः!' इति अचिन्तयत् प्रकाशानन्दः। 'विषयवासना अधःपतनस्य हेतुः' इति मित्रं ज्ञापयितुम् ऐच्छत् सः। अतः सः कदाचित् रामानन्दस्य आश्रमं प्रति अगच्छत्। तेन रामानन्दविषये यद्यत् श्रुतम् आसीत् तत्सर्वं वास्तविकम् एव आसीत्। सः रामानन्दम् एकान्ते अवदत् – "मित्र! वैभवोपेतजीवनयापनं किम् उचितम्? सम्पत्तिमोहः न युक्तः। एतस्य त्यागः वरम्। इतः दूरं गन्तव्यम्। मम आश्रमम् आगच्छतु। आध्यात्मिकं जीवनं यापयतु च" इति।

"यदि भगवतः इच्छा तथा अस्ति तर्हि भवतु नाम" इति अवदत् रामानन्दः।

तावता तयोः कश्चित् प्राचीनसुहृत् धावन् आगत्य अवदत् – "गुरुवर्यः नद्याः अपरस्मिन् तीरे तिष्ठति। सः कञ्चित्कालम् एव तत्र तिष्ठेत्। भवन्तौ द्रष्टुम् इच्छति सः। सः भवन्तौ हिमालयं नेतुम् इच्छति प्रायः" इति।

तत् श्रुत्वा प्रकाशानन्दः महता आनन्देन – "अहो, अहम् इदानीं यदत्र अस्मि तत् तु परमसौभाग्याय जातम्" इति उक्त्वा क्षीणस्वरेण स्वगतं पुनः अवदत् – "एतं विषयम् अहं मम भक्तान् कथं वा वक्तुं शक्नुयाम् इदानीम्?" इति।

तदा रामानन्दः अवदत् – "तत्सर्वं गुरुवर्यः द्रक्ष्यति" इति। रामानन्दः शिष्येषु कमपि उद्दिश्य वार्ताप्रेषणे उत्सुकः न आसीत्।

ततः उभौ अपि सरयूनदीतीरं गतवन्तौ। अपरतीरं प्रति गमनाय काचित् नौका तत्र सिद्धा आसीत्। द्वित्राणाम् एव अवकाशः आसीत् तत्र। एतावता प्रकाशानन्दः स्वस्य दण्डं स्मृतवान्। सः दण्डः तस्य प्रियः आसीत्। सुवर्णमुकुटेन राजमानः सः मसृणः अपि आसीत्।

"राम! भवान् अग्रे गच्छतु। भवतः प्रकोष्ठे मया स्वकीयः दण्डः त्यक्तः अस्ति। तम् अहम् अचिरात् एव आनेष्यामि" इति उक्त्वा रामानन्दस्य वसतिं प्रति प्रस्थितवान् प्रकाशानन्दः। रामानन्दः, सः वार्तावाहकः सुहृत् च नौकाम् आरूढवन्तौ। नौका वेगेन अग्रे प्रस्थिता।

प्रकाशानन्दः अर्धघण्टानन्तरं पुनरपि तीरसमीपम् आगतः। तावता नद्यां प्रवाहः प्रवृद्धः आसीत्। अपरतीरं प्रति गता नौका तत्रैव स्थिता आसीत्। प्रवाहवेगस्य क्षीणता यावत् न भवति तावत् प्रकाशानन्दः अपरं तीरं गन्तुं न शक्नुयात् एव। प्रायः तदर्थं सप्ताहं यावत् प्रतीक्षा करणीया भवेत्।

प्रकाशानन्दः तीरस्थायाः कस्याश्चित् शिलायाः उपरि उपविश्य खेदेन अचिन्तयत् – 'अहो, मूर्खता मम! सम्पत्तिमोहः त्यक्तव्यः इति मया सुहृत् उपदिष्टः। सः तु लीलया तत् कृतवान्। इतः निर्गमनात् पूर्वं स्वस्य भक्ताः अपि न सूचिताः तेन। दैवं व्यवस्थापयिष्यति सर्वमपि इति तस्य चिन्तनम् आसीत्। अहं तु आध्यात्मिकजीवनं यापयन् अस्मि इति चिन्तयामि स्म। किन्तु गुरोः मेलनार्थं यः अवकाशः प्राप्तः तस्मात् अहं वञ्चितः अभवं कस्यचित् दण्डस्य कारणेन। दण्डव्यामोहम् अपि अहं जेतुं शक्तः न जातः' इति।

## ग्रन्थपरिचयः ( दूतघटोत्कचम् )

व्योम शाहः

( अनुवर्तते)

पुनरपि दुर्योधनः क्षुल्लकबुद्धिप्रयोगं दर्शयन् अभिमन्योः मरणं पितामहेन भीष्मेण सह तोलयति । अभिमन्योः बालत्वं पुरस्कृत्य ये आपेक्षाः धृतराष्ट्रेण कृताः, तान् एव निवारयितुम् एषः दुश्शासनः रणे तस्य अभिमन्योः विक्रमस्य विषये वदति। तत् श्रुत्वा धृतराष्ट्रः सद्यः एव प्रतिवचनं करोति यत् – बालेनैकेन तावद्भोः सौभद्रेणेदृशं कृतम्। पुत्रव्यसनसन्तप्तः पार्थो वः किं करिष्यति। तमेव व्यावृत्य दुर्योधनः धृतराष्ट्रं पृच्छति यत् किमु कर्तुं समर्थः पार्थः ? इति । उभयोः अर्जुनस्य पराक्रमस्य विषये महान् तीक्ष्णसंवादः भवति । तस्मिन्नेव सन्दर्भे दुर्योधनः बालः इव पार्थकर्णयोः तुल्यताम् आविष्करोति । पिता धृतराष्ट्रः अर्जुनस्य पराक्रमविषये ज्ञापयति कर्णस्य च व्याजप्राप्तविद्याविषये पुत्रं दुर्योधनम् अवबोधयति। तदैव तत्र भूमिकम्पः भवति। भटः धृतराष्ट्रस्याज्ञया भूमिकम्पस्य कारणं ज्ञातुं पाण्डवशिबिरं गच्छति। ततः आगत्य सः अर्जुनस्य प्रतिज्ञाविषये वार्तां नृपाय व्याहरति। तस्माद् एव कारणाद् भूमिः कम्पिता इति निवेदयति। ''**येन मे निहितः पुत्रस्तुष्टिं ये च हते गताः ।**

**श्वः सूर्येऽस्तमसम्प्राप्ते निहनिष्यामि तान् अहम् ॥**''

व्याघातविषये ज्ञातुम् उत्सुकः दुर्योधनः भटं परिपृच्छति। भटः प्रतिवदति 'चितारोहणम्' इति। दुर्योधनः तद्वाक्यम् उच्चैः पुनःपौन्येन उक्त्वा महान्तम् आनन्दम् अनुभवति। मुदमानं दुर्योधनं धृतराष्ट्रः अग्रिमदिने जयद्रथस्य रक्षणं कथं करिष्यति इति पृच्छति। ततः प्रविशति घटोत्कचः।

भ्रातृवधात् क्रुद्धः घटोत्कचः प्रवेशसमये 'गुरुः शत्रुतां गतः' इति वाक्यं वदति। घटोत्कचः श्लोकार्धेन वदति अपरं च पादं दुर्योधनः पूरयति। घटोत्कचस्य प्रत्येकं वाक्ये धार्तराष्ट्रणां धृतराष्ट्रस्य च कृते घृणा साक्षाद् अयत्नेन आविर्भवति। सः धृतराष्ट्रम् – 'अनार्यशतोत्पादयिता' इत्युक्त्वा सम्बोधयति। ततः सः धृतराष्ट्रम् अभिवादयति जनार्दनस्य च सन्देशविषये ज्ञापयति। श्रोतुकामः धृतराष्ट्रः स्वस्थानाद् उत्तिष्ठति। घटोत्कचः तम् उपवेष्टुं निवेदयति।

सः कटुभिः वचनैः धृतराष्ट्रम् आक्षिपति – ''एकपुत्रविनाशाद् अर्जुनस्य तावद् ईदृशी खल्ववस्था का पुनर्भवतो भविष्यति ? ततः क्षिप्रम् इदानीम् आत्मबालाधानं कुरुष्व। यथा ते पुत्रशोकसमुत्थितोऽग्निः न दहेत् प्राणमयं हविः'' इति। सर्वेऽपि इदं वचः श्रुत्वा हसन्ति। ततः धार्तराष्ट्र–घटोत्कचयोः तीक्ष्णं वाग्युद्धं प्रारभते। दुर्योधनः स्वस्य क्षत्रियत्वे मदम् आविष्कुरुते। घटोत्कचस्य च राक्षसत्वम् उपालभते। 'यूयं राक्षसेभ्योऽपि क्रूरतराः' इति वचनेन सप्रमाणं धार्तराष्ट्राणां क्रूरतां व्याहरति घटोत्कचः। क्रुद्धः सन् दुर्योधनः तेन सह योद्धुं न इच्छति इति कथयति। धृतराष्ट्रः ततः सर्वान् मर्षयितुं निवेदयति। ततः दुर्योधनः प्रख्यातिम् उक्तिं वदति।

''तिष्ठ त्वं सह पाण्डवैः प्रतिवचो दास्यामि ते सायकैः'' इति। नाट्यस्य समाप्तिः भरतवाक्यात्मकेन जनार्दनस्य पश्चिमसन्देशेन भवति।

**कृतेः वैशिष्ट्यम्** – लक्षणानुगुणं प्रथमाद् एव भटवाक्याद् आरभ्य करुणः एव रसः नाट्ये सर्वत्र व्याप्तः।

– भरतमुनेः नाट्यशास्त्रस्य नियमान् अनुसरन् भासः अन्तःपुरस्थानां स्त्रीणां कृते शौरसेनीभाषायाः एव प्रयोगं करोति।

– पितृपुत्रयोः अथवा घटोत्कच–धार्तराष्ट्राणां – सर्वत्रापि भासेन घोरं वाग्युद्धं गुम्फितम्।

– एतत् सर्वमपि महाकविना भासेन स्वतः एव गुम्फितम् उत्प्रेक्षितं च। इत्यलं विस्तरेण॥

( समाप्तम् )


## मासवार्ता

### सम्पन्नः भव्यः 'संस्कृत-लिटरेचर-फेस्टिवल' कार्यक्रमः ।








एकलव्य-संस्कृत-एकेडेमी, संस्कृतविद्याप्रतिष्ठानं, संस्कृत-साहित्य-अकादमी इत्येतेषां संयुक्तोपक्रमेण अगस्तमासस्य २७, २८ दिनाङ्कयोः अहमदाबादनगरे सम्पन्नः भव्यः 'संस्कृत-लिटरेचर-फेस्टिवल' कार्यक्रमः । कार्यक्रमेऽस्मिन् संस्कृतम् अधिकृत्य विविधाः विषयाः तद्यथा संस्कृतवाङ्मयपरिचयः, Tech Resources for Sanskrit, Sanskrit in Pop Culture, शीघ्रकाव्यनिदर्शनम्, वेदपरम्परा, शलाकापरम्परा, शास्त्रार्थपरम्परा, संस्कृत-अन्त्याक्षरी च संस्कृतरसिकानां पुरतः प्रस्तुताः । रात्रिकार्यक्रमे २७ दिनाङ्के 'मेघदूतम्' इति नृत्यनाटिकायाः प्रयोगः, २८ दिनाङ्के च आदिशङ्कराचार्यस्य जीवनम् अधिकृत्य 'शिवोऽहं शिवोऽहम्' इति नाटकस्य प्रयोगः अभवत् । अत्र उल्लेखनीयं यत् भारते प्रथमवारं अयं प्रयोगः अहमदाबादनगरे सम्पन्नः । कार्यक्रमेऽस्मिन् भागं स्वीकृत्य संस्कृतरसिकाः प्रसन्नाः आसन् ।

## कृपया हसन्तु

पत्नी - (पतिम् उद्दिश्य) भो: शृणोति खलु भवान् ?

पति: - आम् शृणोमि । वदतु ।

पत्नी - वैद्य: माम् मासं यावत् विश्रमितुम् उक्तवान् अस्ति, तदपि अत्र न, विदेशे । तर्हि आवां कुत्र गमिष्याव: ।

पति: - अन्यस्य वैद्यस्य समीपम् ।

★ ★ ★ ★ ★

शिक्षक: - (रमणम् उद्दिश्य) यमुनानदी कुत्र प्रवहति ?

रमण: - भूमौ प्रवहति ।

शिक्षक: - (मानचित्रं प्रदर्श्य) मानचित्रे प्रदर्शयतु । यमुनानदी कुत्र प्रवहति ?

रमण: - मानचित्रे कथं दर्शयामि ? मानचित्रम् आर्द्रं भविष्यति खलु ?

★ ★ ★ ★ ★

नमन: - (रमणम् उद्दिश्य) भो:, अद्यारभ्य गृहं गत्वा पत्न्या सह सम्यक् व्यवहारं करोतु ।

रमण: - किमर्थम् एवं वदति ?

नमन: - भवान् न जानाति ? अचिरादेव आपणा: भोजनालया: च पिहिता: भविष्यन्ति इति श्रूयते । तदनन्तरं तु सा एव शरणं खलु ?

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**गच्छन् पिपीलको याति योजनानां शतान्यपि ।**
**अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ॥**

**तात्पर्यम्** – पिपीलकस्य चलनं भवति बहु मन्दम्। गरुडस्तु महता वेगेन सञ्चरति। तथापि चलन् पिपीलक: शताधिकानि योजनानि अग्रे गच्छेत्। गरुड: निश्चल: तिष्ठति चेत् पदमात्रमपि अग्रे न गच्छेत्।

**गते शोकं न कुर्वीत भविष्यं नैव चिन्तयेत् ।**
**वर्तमानेषु कालेषु वर्तयन्ति विचक्षणा: ॥**

**तात्पर्यम्** – गतस्य विषये दु:खं न करणीयम्। भविष्यस्य विषये कदापि चिन्ता न कर्तव्या। विचारशीला: बुद्धिमन्त: प्रस्तुतविषयमात्रे एव तत्परा: भवन्ति।

**ग्रसमानमिवौजांसि सहसा गौरवेरितम् ।**
**नाम यस्याभिनन्दन्ति द्विषोऽपि स मत: पुमान् ॥**

**तात्पर्यम्** – यस्य नाम गौरवेण स्वीक्रियते, यस्य नाम्न: स्वीकारेण पराक्रमस्य तेज: प्रसरति, यस्य नाम शत्रव: अपि अभिनन्दन्ति स एव पुरुष: सम्मानयोग्य: अस्ति।

## ज्ञानसरित्

डो. वासुदेवः पाठकः 'वागर्थः'

**रामदासः**

**रा**मदास्सदैवाहम्
**म**नसाकर्मणा तथा।
**दा**शरथीं विपुं वन्दे
**स**स्सत्त्वेन समायुतः॥

**सोमनाथः**

**सो**मनाथं वरं पुण्यम्
**म**हादेवं प्रधानतः।
**ना**ट्यप्रियं नटेशं च
**'थ'**वत् स्थिरं भजेन्मुदा॥ थः – पर्वतः

**कालिदासः**

**का**सारस्वतसारेण
**लि**प्ता, येनवराकृता।
**दा**क्ष्यं यस्य प्रशस्यं च
**स**स्सदा राजते कविः॥ का– पृथ्वी

**प्रहेलिकाः**

प्रभोः किं प्रथमं नाम ? मन्त्रश्च कः परोमतः ?
कश्च कल्याणदः श्रेष्ठः ? **ॐ कारः प्रणवः शिवः॥**

कुत्र सज्जनता सेव्या ? कदा श्रद्धा फलान्विता ?
किं प्राप्यते शुभे कार्ये ? **सर्वत्र सर्वदा शुभम्॥**

बुद्धिमान् किं त्यजेत् शीघ्रम् ? सुज्ञः दुष्टं करोति किम् ?
कः सुखी जीवने नित्यम् ? **गर्वं त्यजति बुद्धिमान्॥**

त्याज्यं किं सर्वथा लोके ? कदा सज्जन–सेवनम् ?
दुष्टसंगस्य किं कार्यम् ? **अभद्रं सर्वदा हेयम् ?**

वृषभानोस्सुता कास्ति ? कश्चास्ति पार्थसारथिः ?
कार्या सेवा कथं नित्यम् ? **राधा कृष्णश्च भावतः॥**

अत्र पद्येषु, चरणत्रये (पादत्रये) प्रश्नाः। चतुर्थे पादे प्रश्न–त्रयस्य उत्तराणि। बहुधा, चतुर्थे पादे शब्दानां तथा आयोजनं क्रियते यथा कापि सूक्तिः भवति।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| तालवृन्तम् | पंखा | fan |
| उर्वरा | उपजाऊ ( भूमि ) | fertile (land) |
| क्ष्वेडः | विष | poison |
| भाटिः | दर | wage |
| करण्डः | मधु का छत्ता | bee-hive |
| स्मेरः | मुस्कुराता हुआ | smiling |
| उत्क्षेपः | ऊपर फेंकना | throwing up |
| मिषम् | कपट | deceit |
| द्रधस् | स्वर्ग एवं पृथ्वी | heaven & earth |
| पर्णासः | तुलसी | tulasi (Basil) |
| पल्यङ्कः | खाट | bed |
| क्षोणिः | पृथ्वी | the earth |
| प्राबोधकः | उषा | dawn |
| अर्धा | मूल्य | price/ value |
| सितः | श्वेत | white |

## किं भवन्तः जानन्ति ?

**१ ) मान्यतानुगुणम् इदानीं यावत् कति मन्वन्तराणि जातानि ?**
(क) अष्ट (ख) द्वादश (ग) चतुर्दश (घ) अष्टादश

**२ ) बुद्धः जीवनस्य कतमस्मिन् वर्षे निर्वाणं प्राप्तवान् आसीत् ?**
(क) सप्ततितमे (ख) अशीतितमे (ग) द्विसप्ततितमे (घ) त्रिसप्ततितमे

**३ ) महावीरः जीवनस्य कतमस्मिन् वर्षे निर्वाणं प्राप्तवान् आसीत् ?**
(क) सप्ततितमे (ख) एकसप्ततितमे (ग) द्विसप्ततितमे (घ) त्रिसप्ततितमे

**४ ) जिनधर्मे कति तीर्थंकराः जाताः ?**
(क) २० (ख) २१ (ग) २२ (घ) २४

**५ ) एकस्मिन् संवत्सरे कति दिनानि भवन्ति ?**
(क) ३६० (ख) ३७० (ग) ३४० (घ) ३५०

**६ ) भारतस्य प्रमुखानि धामानि कति सन्ति ?**
(क) ५ (ख) ६ (ग) ४ (घ) ८

**७ ) कतिप्रकारकाः भक्तयः मताः सन्ति ?**
(क) ७ (ख) ८ (ग) ९ (घ) १०

उत्तराणि – (१) ग (२) ख (३) ग (४) घ (५) क (६) ग (७) ग

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

Online
**Admission Open**

## संस्कृतभाषाशिक्षणम्

**Second Level**

**Date :** 1/9/22 to 30/12/22
**Day :** Mon-Wed-Fri
**Time :** 7:30am to 9:00am
**Fees :** 5000/-

**First Level**

**Date :** 10/10/22 to 10/1/23
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 5000/-

**contact: Dr Mihir Upadhyay, 98246 16237**

संस्कृत-
**साम्प्रतम्**

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

- શું તમે સંસ્કૃત બોલવા ઇચ્છો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા ઇચ્છો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા ઇચ્છો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકિર્દી બનાવવા ઇચ્છો છો ?

તો અહીં છે, એક તક એકલવ્ય સંસ્કૃત એકેડેમી દ્વારા આયોજિત

## "Diploma In Sanskrit Teaching"

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી માન્ય કોર્ષમાં**
ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

**અભ્યાસક્રમની વિશેષતાઃ**

→ તાલીમ માટેનું ગુણવત્તાયુક્ત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવી શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરોઃ ડો. મિહિર ઉપાધ્યાય **9824616237**

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006